अत्र साक्षिण: सूर्याचन्द्रमसौ बुद्धधर्म संहा: (घा:) चत्वारि लंवपादानां स्थानानि सर्वे हिता: भाँडागारिणश्च । षष्टिर्वर्षसहस्राणि स्वर्गे तिष्ठति भूमिद: । अच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ यतो धर्मस्ततो जय: । किं वहूक्तेनेति शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतापमल्लको कृष्णमन्दिरको शिलालेख

20281 आसीच्छ्रीसूर्यवंशे रघुनृपकुलजो रामचन्द्रो नृपेश-
स्तद्वंशे नान्यदेवोवनिपतिरभवत्तत्सुतो गांगदेवः।
तत्पुत्रोऽभून्नृसिंहो नरपतिरतुलस्ततसुतो रामसिंहः
तज्जः श्रीशक्तिसिंहो धरणिपतिरतो भूप भूपालसिंहः ।। (१)

तस्मात्कार्णाटचूडामणिरिव हरयुत्सिंहदेवोस्य वंशे
भूपः श्रीयक्षमल्लो नरपतिरतुलो रत्नमल्लोप्यमुष्मात् ।
तस्मात् श्रीसूर्य्यमल्लोऽवनिपतिरभवत्तत्तनूजोमराख्यो
मल्लो भूत्तस्य पुत्रो रिपुगणविजयी श्रीमहेन्द्राख्य मल्लः ।। (२)

तस्मात् श्रीशिवसिंहोभूद्धरिहरसिंहसुतस्तस्मात् ।
तस्माल्लक्ष्मीनृसिंहोपि नरसिंहपराक्रमः ।। (३)

तस्मात् श्रीमत्प्रतापो नरपतिरभवद्भूपमालावलीषु
न्यस्यत्पादारविन्दद्वयरसविलसद्रेणुभिर्भूषणानि ।
योऽकार्षीत्कूतिखाखाकिरमिति सहसा भोटभूपस्य देशा-
ज्जग्राहैवावदोनं प्रतिदिनमपरे यं भजन्ते नरेशाः ।। (४)

भक्तग्रामनरेशमल्लनृपतिर्द्दत्वेभमेनं भिया
भेजेसौ वसुधां जहार सुदृढं संदार्य्य दुर्गं पुनः ।
श्रीमड्डंवरसाहभूपतिवलं विध्वस्य दन्तावलम्
श्रीमत् सिद्धिनृसिंहमल्लनृपतेर्ज्जग्राह दुर्गावली (म्) ।। (५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्ते काप्यमरावतीव विलसद्दन्तीन्द्रदिव्याङ्गना-
युक्ता स्वर्णमयी विहारनगरी सा राजधानी परा।
श्रीमत् श्रीकमताधिकामरुपतेरिन्द्रेण तुल्यस्य च
प्रत्यर्थिव्रजनिर्ज्जितस्य नरयुन्नारायणस्यापि च ॥ (६)
लक्ष्मीनारायणस्तस्मात् धीरनारायणस्ततः ।
पुत्री रूपमती तस्य प्राणनारायणः सुतः ॥ (७)
सेयं रूपमती सती गुणवती स्वर्णद्युतिः सन्मतिः
मात्तकुंजरगामिनी प्रणयिणी (नी) साक्षात् परा रुक्मिणी ।
आसीत्सर्व्वगुणस्थितेर्न्नरपतेः श्रीमत्प्रतापस्य सा
पत्नी प्राणसमा यथा जलनिधेः पुत्री जगत्पायिनः ॥ (८)
कार्णाटी रंगघाटी कुचकनकघटी कामलीलैकवाटी
स्वर्णालंकारकोटी हरिसदृशकटी चारुदेहानुपाटी ।
नाम्ना राजमती महारसवती भूपप्रतापस्य सा
भूता भोगवधूटिका किल हरेर्भामेव जीवाधिका ॥ (९)
स्वर्गार्थं कृतवान् प्रतापनृपतिः सद्योषितोरेतयो ०२३५०
प्रासादं वसुपत्रपद्मसदृशं श्रृंगाष्टकैः शोभितम् ।
नानाचित्रविराजितं सममयं तद्वैजयन्तेन वै म
होमाद्यैरकरोच्छ्रुतिस्मृतिमतैरस्य प्रतिष्ठाविधि ॥ (१०)
एतयोर्म्मास्तु विश्लेषो रुक्मिणीभामयोरिति ।
जन्मान्तरेप्ययं भूपो हरिर्मूर्तिरिहावसत् ॥ (११)

अतः परं देशभाषा ॥ हव सूर्य्यवंशस श्रीरामचन्द्रअवतार जुर, थ्वया वंशस नान्यदेव, थ्वया काय नरसिंहदेव, थ्वया काय रामसिंह, थ्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काय नरसिंहदेव, थ्वया काय रामसिंह, थ्वया काय शक्तिसिंह, थ्वया काय भूपालसिंह थ्वनलि हरसिंहदेव नेपाल विज्याकरम: थ्वया वंशस यक्षमल्ल, थ्वया काय रत्नमल्ल, थ्वया काय सूर्य्यमल्ल, थ्वया काय अमरमल्ल, थ्वया काय महेन्द्रमल्ल, थ्वया काय शिवसिंह, थ्वया काय हरिहरसिंह, थ्वया काय लक्ष्मीनरसिंहमल्ल, थ्वनलि श्री श्रीप्रतापमल्लदेव दत्त, विहारदेशया राजा नरनारायण, थ्वनलि लक्ष्मीनारायण, थ्वनलि वीरनारायण, थ्वया काय प्राणनारायण, म्ह्याच श्रीरूपमती देवी दत्त, थ्व रूपमति देवी श्रीश्रीप्रतापमल्लया पत्नि, कर्णाटदेशया श्रीराजमती प्रेयसी थ्वपनि नेम्ह्रसं परलोक जुयाव श्रीश्रीप्रतापमल्लन थ्व देवल दयक विज्याङाव रुक्मिणी सत्यभामाया स्वरूपन नेम्हस सारिक दयकाव जन्मान्तरसं वायमुमालके कामनान थव नामनं वंश गोपालमूर्ति स्थापना याङ विज्याङ जुरो ॥ सम्वत् ७६६ फाल्गुण कृष्णषष्ठ्यान्तिथौ अनूराढ नक्षत्र हर्षन योग बृहस्पतिवासर ॥ अतः परं पून भाषा ॥ तूसाधन गुथि पूतच्छा गुथि घवनच्छा गुथि कृष्णाष्टमी गुथि दोलजात्रा गुथि कार्तिक आदिन पर्व्वकालस चाकलमत नित्यपूजा आदिन मालक्व गुथिया साहासन खिजच्य तिसतया ॥ थ्वसहासन रोहो; ह्लावे चाहिकन पिचिल थिचिल यातसा स्यनकलसा पञ्चमहापातक ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न-र-र-लैगुरौ :'इन्दिरा' मता

गीर्वाणयुद्ध साहको वाग्वती अभिलेख

श्रीगणेशाय नमः ।। श्रीवाग्वत्यै नमः ।।

जननि वाग्वति त्वत्स्तुतीरवाङ्मनसगोचराः कर्तुमीश्वराः ।।
जगति पामरा मादृशा नराः कथमर्लतरामत्र सह्यताम् ।। १ ।।

जलरुहं जलाज्जायते जलाज्जलरुहान्न हि व्याप्तिमत्र ताम् ।।
इति विधेर्हरस्यम्ब भीतिभिः शिवमुखाब्जजा त्वं सती भुवि ।। २ ।।

पशुपतेः स्फुटां त्वां दधामहं जननि वेद्मि यत्त्वामुपागताः ।।
शिवपुरे जना भस्मधारणाः शशिविभूषणा नन्दिवाहनाः ।। ३ ।।

जलकणैर्युतो मारुतो वहन्नयति शुद्धतां दिग्विदिक्स्थितान् ।।
जननि जन्मिनः पातकात्मनः सुरपुरेन्ततः स्पर्शमात्रतः ।। ४ ।।

तव जलं समाश्रित्य यो जनः शिशिर आगते कम्पते ततः ।।
स्मरशरव्यथाकम्पनं जनाद्धघत उर्वशीमुखघनायिकाः ।। ५ ।।

पतति यज्जले वस्तु तल्लघु किमपि यत्र वाःपूर एति तम् ।।
ननु यतो भवत्यम्ब तत्र किं त्वयि पतज्जनस्त्वेति तं शिवं ।। ६ ।।

जलगतं च यत्तच्च मज्जति गुरु किलेह यस्त्वज्जले जनः ।।
जननि पातकाद्योघसंचितो भवति मग्न उन्मज्जतीश्वरि ।। ७ ।।

घनविसर्जनं देवतार्चनं जननि तर्पणं पिण्डपातम् ।।
तव तटे जनो यत्करोत्ययं भवति तस्य तत्पुण्यमव्ययम् ।। ८ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपह्नुति तव जलामृतं हस्तसंभृतं यदिह संततं पीयतेमृतम् ॥
जननि मन्यते तन्न चामृतं जलधिनिर्मितः सृतं देवतामृतम् ॥ ९ ॥
तव तटे जनन्यत्र वासतः पशुपतिर्जगन्मुक्तये स्थिराम् ॥
परिहसत्यहो विश्वनाथसत्कृतसुरापगां काशिकावहाम् ॥ १० ॥
तवतटोदरे तीर्थकोटयस्तदुपवर्णने चेच्चतुर्मुखः ॥
दशशताननः स्यामहं तदा किमु भवेयमीदृक् तु न क्षमः ॥ ११ ॥
पशुपतिः शिवो ज्योतिरीश्वरः सकलसिद्धिदा गुह्यकालिका ॥
विजयते मुदा त्वत्तटे सदा त्वमिह सर्वदात्रेति नाद्भुतम् ॥ १२ ॥
सलिलसन्निधौ दैवयोगतो मृतिमुपागता ये चराचराः ॥
विरहिता अमी कोटिजन्मसंचितमलैर्व्रजन्तीशपत्तने ॥ १३ ॥
शिव जगत्पते पार्वतीपते पशुपते महादेव शंकर ॥
इति सुजल्पतोऽहर्निशं मम भवतु त्वत्तटे गङ्गिके स्थितिः ॥ १४ ॥
तव जलेथवा जन्हुजाजले शिव शिवेति वा राम राम वा ॥
मरणसन्निधौ जिह्विका मम वदतु ते स्तुतेरम्ब पाठतः ॥ १५ ॥
यदमलाम्बुनो नित्यसेवनं वृजिननाशनं दुःखदारणम् ॥
भविकभावनं मुक्तिकारणं शरणमेमि तां वाग्वतीमहम् ॥ १६ ॥

सूरीन्द्ररामहृदयस्य सुतेन भवत्या ।
वाणीविलासविदुषा रचितस्तवोऽयम् ॥
अस्योपसि प्रपठनाद्भवतु प्रसन्ना ।
श्रीवाग्वती वरनदी निखिलाघहन्त्री ॥ १७ ॥

इतिश्रीमन्महाराजाधिराजराज्ञ्याः श्रीललितत्रिपुरसुन्दरीदेव्या आज्ञया रामहृदयपण्डितात्मजवाणीविलासपण्डितकृतं वाग्वतीस्तोत्रम् शुभम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ श्रीवाग्वत्यै नमः ॥ श्रीवैश्न (ष्ण) व्यै नमः ॥

यदमलाम्बुनो नित्यसेवनं वृजिननाशनं दुःखदारणम् ।
अविकभावनं मुक्तिकारणं शरणमेमि तां वाग्वतीमहम् ॥ १ ॥

भक्तैतद्देशभूपाभ्युदयशतकरी कालिका जागरूका ।
योगी गोरक्षनाथोऽपि च जयति सदा यत्र विघ्नं विनिघ्नन् ॥
शूराः सन्ति प्रजाः स्वप्रभुहितनिपुणा न्याययुक्ताः स्वतन्त्राः ।
योऽयं गोर्खाभिधानो जगति विजयते कोऽपि रम्यः प्रदेशः ॥ २ ॥

तत्र द्रव्येशसाहो नृपवर उदितः पूर्णसाहोऽस्य पुत्र-
स्तस्य श्रीरामसाहो विरचितविविधश्लाघ्यलोकव्यवस्थः ।
तस्माच्छ्रीडम्बराख्योऽजनि तनयवरस्तत्सुतोऽभून्महात्मा
नाम्ना श्रीकृष्णसाहोऽभवदमलयशा रुद्रसाहोऽस्य सूनुः ॥ ३ ॥

भूपः पृथ्वीपतिस्तत्सुतवर उदभूत्तज्ज—निर्वीरभद्र—
स्तस्मात्सत्सिद्धिशाली समजनि नरभूपालसाहोऽवनीशः ।
पृथ्वीनारायणोऽस्मादुदभवदवनावुद्यदुद्दामकीर्ति—
र्नेपालचोणिपालप्रबलरिपुकुले कल्पकालानलाभः ॥ ४ ॥

भूपो भक्तिभरेण योऽल्पवयसि प्राप्यैव वाराणसीम्
यात्रानन्तरमागतो स्वमहसा मार्गावरोधोद्यतान् ।
हत्वारीन्स्वपुरीं प्रविश्य च नवकोटाख्यदुर्गं बला—
ज्जित्वा प्राप च काष्ठमण्डपपुरीं संहृत्य कोटिं द्विषाम् ॥ ५ ॥

तस्मात्सिंहप्रतापोऽजनि नृपतिपतिः पुण्यवान्सत्प्रतापः
प्रादुर्भूतोऽप्यमुष्माज्जगति रणबहादूरराजाधिराजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालामालावलीलावलयरिपुकुलालोललीलाविलासो—
ल्लासासक्तावलालीकुचकलशविधिव्यर्थताकर्तृतेजाः ॥ ६ ॥

दाता पाताऽनुशास्ता निखिलगुणनिधिर्गानविद्यादिविद्या—
ऽभिज्ञो यः कम्पमाना विपुलभयवशात्पालयन्त्यादरेण ।
प्राक्प्रत्यक्सव्यसव्येतरत उपचरन्तोऽधिया यस्य विज्ञा—
राज्ञामाज्ञां मनोज्ञाः करकमलसत्कुड्मलोल्लासिशीर्षाः ॥ ७ ॥

सौन्दर्यातिशयादमुष्य नृपतेः प्राणाधिकप्रेयसी
श्रीमत्कान्तिमती त्रिलोकविदिता जायाऽभवद्वीक्ष्य याम् ।
एषा कापि सुराङ्गनासु किमियं किं नागकन्यासु वा
कामस्येति रतिः प्रिया किमथवा लोकोऽयमाशङ्कत ॥ ८ ॥

पुत्रं पर्वतचक्रवर्तिनृपतिं सिंहासनाध्यासितम्
स्वीयं वीक्ष्य विधाय दाननिकरानङ्के स्थिता स्वामिनः
एषा भागवतार्थमन्तसमये वाणीविलासाद्बुधा—
दाकर्ण्यैव हरिं निधाय हृदये लीना परब्रह्मणि ॥ ९ ॥

ललितत्रिपुरादिसुन्दरी चरमामुष्य नृपस्य सुन्दरी ।
जयति त्रिजगत्सु सुन्दरी भुवि कैलाश इवेशसुन्दरी ॥ १० ॥

स्वाङ्के स्वस्वामिना श्रीगुणवति निहिते भूमिपे पुत्रवर्ये
प्राणानाथाय नारायणचरणमनाः पुण्यकर्माणि नित्यम् ।
कुर्वाणाऽनाथदीनागतिकजनकृपापारवारां निधिः सा
साध्वीनामग्रगण्या जगति विजयते भूमिपालेन्द्रपत्नी ॥ ११ ॥

गीर्वाणोत्तरयुद्धविक्रमनृपः प्रोद्भूत उर्वीभृतः
पुत्रोऽस्माज्जलधेः सुधांशुरिव सद्धामाभिरामोदयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकानन्दकरः प्रचण्डमहसः सार्द्धाब्दको लब्धवान्
यो राज्यं जनकान्निजाज्जगति सज्जन्युन्नजानां मुदे ॥ १२ ॥
कर्णे दानं मनोजे द्युतिमतिसुकृती धर्मराजेर्जुने स—
च्छौर्यं गाम्भीर्यधैर्ये अधिजलधि रवौ तेज आल्हादकत्वम्
चन्द्रे भोजे प्रसादं कविजनकविताःस्वाद आधाय नूनम्
वाच्छन्नेकत्र धाता स्थितमिदमखिलं सृष्टवान्द्रष्टुमेतम् ॥ १३ ॥
ज्येष्ठा श्रीसिद्धिलक्ष्मीर्विलसति महिषी यस्य गोरक्षराज-
लक्ष्मीश्चैतत्द्वयीयं पतिभजनपरा सर्वसाध्वीषु धन्या ।
प्रायो भूपोऽपि भूयोऽमुतकलिमहिमोद्भूतभूभारहेतु
ध्वस्त्यै कृश्नो (कृष्णो) वतीर्णोऽयमियमपि मुदे रुक्मिणीसत्यभामा ॥१४॥
यस्य श्रीभीमसेनः सचिवकुलमणिर्भाति भूपालमौलेः
कस्मिंश्चिद्घोरविघ्ने निपतति विधितो धीरगम्भीरधीर्यः
आवीद्भूर्त्तं धियोपद्रवशममकरोत्स्वीययायुष्यहेतोः
राज्ञः कीर्त्यै च नानाविध विमलयशो हेतु कर्माणि मन्त्री ॥ १५ ॥

जरन्नव्यं रम्यं प्रमदवनमध्वादिघटनम्
पुरद्वारं वृष्ट्या तपविकललोकाश्रमयुतम् ।
तथा वारुत्खानाभिधमथ मजागद्देवलमिति
प्रसिद्धं गोर्खायामपि नृपगृहं भीमरचितम् ॥ १६ ॥

यो दक्षं लक्ष्यवेधे रुचिरहरिकथाकर्णनैकाग्रचित्ताम्
तुङ्गं रिङ्गत्तुरङ्गं व्यधितवशयितुं संप्रवीणं प्रभुं स्वम् ।
बाल्ये नद्यादिबाहुप्रतरणनिपुणं वर्ण्यनानागुणौघम्
मन्त्रीन्द्रो भीमसेनः सुकृतचयवशाल्लब्ध आभाति यस्य ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्क्रोधश्रुतिमात्रतोऽप्यरिवधूवृन्दाश्रुधारावृह-
द्धारा वोपचिता निरीक्ष्य नटति द्राङ्नीलकण्ठावली ।
यो मातेव पितेव बन्धुरिव सत्स्त्रीव प्रभौ दासव-
च्चास्ते तत्र निधाय भीमसचिवे राज्यं नृपः क्रीडति ।। १८ ।।
कश्चिच्चीनपचक्रवर्तिरचितः सन्धिः समृद्धोऽनिशम्
यन्मन्त्रान्मनसापि नेच्छति भियाऽऽक्रान्तुं प्रवृद्धोप्यरिः ।
ताम्रास्योऽमरसिंह – मन्त्रिवरतः सीम्नि स्थिताद्यात्पितुः
सोऽयं मन्त्रिशिरोमणिर्हितकरो यस्यास्ति सोऽयं नृपः ।। १९ ।।
स्वाम्यर्थाय हि जीवनं भवति तद् भ्रातर्व्रज त्वं युवी-
त्याज्ञप्तो रणसंमुखे नयनर्षि थापा यदीयोऽनुजः ।
स्वप्राणान् जहाद्रिपून् भुजबलादाक्रम्य काङ्डाह्वये
कोटे क्लिष्टपथे प्रवेशसमये मन्त्री सयस्यास्त्यसौ ।। २० ।।
नैपालोऽयमुपद्रवावलिशतस्थानं प्रभुर्बालकः
संरक्ष्यो मम सर्वथा गृहसुखं त्यक्त्वेति भूपालये ।
स्थित्वान्तर्वहिरप्रमोदविलसितो दृष्टिं प्रदायानिशम्
यो जागर्ति स भीमसेनसचिवो यस्यानुरक्तोऽस्त्यसौ ।। २१ ।।
अनुजवखतवारो येन सम्यङ् नियुक्तः
प्रतिपदमवनीशं सावधानोऽवति स्वम् ।
यमऽमृतरणवीरौ भ्रातरौ भक्तिमन्ता-
वनुसरत उदारौ सोऽस्ति भीमो यदीयः ।। २२ ।।
लोका जानीत यूयं प्रभुहितकृतये नाऽभवन्नास्ति भावी
नो मन्त्री भीमसेनादपर इह लसद्बुद्धिचातुर्ययुक्तः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्भीमो गरुत्मानयमुत हनुमान् सेवितो ऽनेन भूपः
कृश्नो (ष्णो) वा राघवोऽवातरदिति कथयत्यत्र वाणीविलासः ॥२३॥
श्रुत्वा यन्मन्त्रिकर्माद्भुतमतिचकितः (स्फूर्ज) यित्वा स्वमूर्ध्नां
कम्पेन द्रष्टुमत्र क्षितितलविवराच्छेष एत्य स्थितः किम् ॥
कायव्यूहेन भीमोत्कटकृतिमिषतो मन्य इत्थं हि नोचे—
द्भूकम्पोऽभूद्विदीर्णा धरणिरपि कथं मन्त्रिकृत्यं च शुभ्रम् ॥ २४ ॥
यत्सचिवं भीमसेनं संमन्त्र्य च वाग्वतीतटे घटनम् ।
सेतोरकृत सुकीर्त्यै श्रीललितत्रिपुरसुन्दरी देवी ॥ २५ ॥
यस्मिन् सुन्दरसेतुवर्यरचनं श्रीभीमसेनान्वयात्
ताराधीशरु (चा वि) भाति हितकृच्छ्रीलक्ष्मणो पेतता ॥
वैदेहीति वचो जनो धरणिभृद्रामा (नुभा) वात्सदा।
लङ्कायादरमेति तत्सुचरितं रामायणं मन्महे ॥ २६ ॥
पारावा (रनि) वासिजन्तु निवहानायासतो निम्नगा—
मेतां मातृकुले तथा पितृकुले भर्त्तुः कुले संस्थिताः ।
ये ये ते पितरोऽपि दुस्तरभवाम्भोधिं प्रमोदान्विता—
स्तीर्त्वोद्यान्र्वृति वाञ्छयाऽकृत वरं सेतुं नृपेन्द्रप्रिया ॥ २७ ॥
पारावारतटस्थलोकवसतिग्रामाभिरामोदया
वाग्वत्यां विहितेयमालिरुपलाबद्धप्रघट्टान्वित ॥
राज्ञ्याः श्रीललितादिमत्रिपुरसुन्दर्याः स्फुरत्यद्भुता
मुक्ति श्रीपुररत्नवृविजयोद्यन्ती पताका किल ॥ २८ ॥
गीर्वाणोत्तरयुद्धविक्रमनृपायुर्वृद्धिदा लेखनी
दैवी निर्मलभीमसेनमनसो वृत्तिः स्फुटा मूर्तिधृक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्तिः कापि शलाकिका त्रिपुरसुन्दर्य्याः स्वनिश्रेयस—
श्रीपूर्व्वारवरुद्धयोररयोरुद्घाटिकोद्घाटने ।। २९ ।।
आलङ्कं शतयोजनो जलनिधिर्यो जानकीजानिना
जायायै तरणाय वानरवरानीकस्य बद्धः पुरा ।
चित्रं तत्र किमत्र यत्त्रिपुरसुन्दर्य्या स्वभर्त्रादिको-
द्धाराया‌ऽक्रियताऽव्यपारभववार्निध्येष सेतुर्दृढः ।। ३० ।।
शाके १७३२ द्वित्रिमुनीन्दुमानिनि नागाङ्गाहिचमासम्मिते
संवत् १८६८ मास्यघिसिद्धि पौश्न (७ण) वणिजे मार्गे गुरोर्वासरे ।
शुक्लैकादशिकान्विते रणबहादूराधिपश्रेयसे ।
राज्ञीयं मकरोदये कृतवती सेतोः शिलान्यासनम् ।। ३१ ।।
गीर्वाणोत्तरयुद्धविक्रममहाराजधिराजाज्ञया
कर्मण्यत्र स भीमसेनसचिवो लक्ष्म्यादिनारायणम् ।।
डिठ्ठेति प्रथितं सुकर्मनिपुणं प्राज्ञं नृपाज्ञाकरम्
प्राचीनानुचरं न्ययुङ्क्त मतिमान् श्रद्धाभरेण द्रुतम् ।। ३२ ।।
सुब्बेतिव्यपदेशभाग्द्विजवरः श्रीलोकार्थाह्वयः
पाँडेः सेवनविज्जयद्रथ इति ख्यातः सुवेदारकः ।
वीरो ज्ञो दलवारसंज्ञकसुवेदारो वरो बुद्धिमान्
सुब्बा पीहुवराभिधोऽतिनिपुणस्तद्वन्नियुक्ता अमी ।। ३३ ।।
एतान् पञ्च नियोज्य कर्मनिपुणान् प्राधान्यतः पावके-
ष्वग्नीन्दु १३५३ प्रमितैः करैः परिमितं सेतुं दृढं सुन्दरम् ।
कृत्वा सिद्धमिमं प्रभुं नृपवरं तन्मातरं स्वामिनीम्
सन्तोष्यास्य स भीमसेनसचिवो व्यज्ञापयत्संस्कृतिम् ।। ३४ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ नरपतिमात्रा दैवतार्चां विधाय
बहुलवसुविसर्गैर्हव्यवाहं सुतर्प्य ।
द्विजसमुदयदीनानाथलोकान्प्रतोष्य
निजपतिपरधामप्राप्तये संस्कृतोयम् ॥ ३५ ॥

संवत् १८६८ न्नागर्तुनागावनिपरिकलिते चैत्रिके कृष्णपक्षे
सप्तम्यां कुम्भगेर्के सुरगुरुदिवसे मैत्रभे हर्षणाख्ये।
योगाग्र्ये द्वन्द्वलग्ने ववकरणयुते हैमसिंहध्वजोद्य—
त्कीर्तिस्तम्भाभिरामो नृपतिमहिलया सेतुरुत्सृष्ट एषः ॥ ३६ ॥

गीर्वाणोत्तरयुद्धविक्रममहाराजाधिराजाज्ञया
जाता श्रीललितोत्तदत्रिपुरसुन्दर्य्याः परात्मेशितुः ।
प्रीत्यै कीर्तिरियं परा विजयतां वाणीविलासस्तुता
कल्पान्तावधि भीमसेनसचिवप्रोद्यत्प्रभावान्विता ॥ ३७ ॥

अतः परं संस्कृतवाणीमजानान्नपि झटित्यर्थबोधाय
स एवार्थः संक्षिप्य भाषया प्रकटीक्रियते

श्री गोर्खा देशमा पहिले श्री द्रव्येशशाह महाराजा हुनुभयो उहाँपछि उनका पुत्र श्रीपूर्णशाह, उनका पुत्र संपूर्ण लोकमा स्थित बाँधन्या श्रीरामशाह, उनका पुत्र श्रीडम्बरशाह उनका पुत्र श्रीकृष्णशाह उनका पुत्र श्रीरुद्रशाह उनका पुत्र श्रीपृथ्वीपतिशाह, उनका पुत्र श्रीवीरभद्रशाह उनका पुत्र देवताको प्रसाद पाएका अनेक सिद्धिले युक्त भयाका श्रीनरभूपालशाह यिनैका पुत्र बाल्यावस्थैमा श्रीकाशी यात्रा गरी फिर्दामा छेकन आउन्या चौकीदार प्रभृति शत्रुसैन्यकन कत्तल गरि गोर्खा शहरमा प्रवेश गर्‍यो पछि नुवाकोट नेपाल प्रभृति देश मारि श्रीमहाराजे बहादुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शम्शेरजङ् पदवी पाउन्या श्रीपृथ्वीनारायणशाह महाराजा हुनु भयो, यिनैका पुत्र प्रजारञ्जन गर्दामा निपुण भएका श्रीसिंहप्रतापशाह महाराजा हुनु भयो. यिनैका पुत्र अति सुन्दर मूर्ति भएका सकल शत्रुको संहार गर्न्या दातामा अग्रगण्य देशका बडा-बडा राजा विषे पनि हुकुम चलाउन्या शस्त्र शास्त्र संगीत तंत्रादि सकल विद्याका निधान श्रीरणबहादुरशाह महाराजाधिराज पुत्रलाई राज्य दीकन स्वामी हुनु भयो. यिनैका अत्यन्त सौन्दर्यले युक्त भएका प्राणभन्दा पनि प्यारी श्रीकान्तिमती नाम भएका पत्नी स्वामिनी हुनु भयो. आफ्ना पुत्रकन पर्वत देशमा चक्रवर्ती महाराजा हुनु भएका सिंहासनमा चढ्याका यस्ता देख्न पाइकन संतोषले युक्त भई शास्त्रमा लेखेका जो दान छन्, ती सबै दान गरीकन अन्तकाल विषे पनि आफ्ना स्वामीलेसँग भई वाणीविलास पण्डितका मुख देखिन् संम्पूर्ण श्री भागवत पुराणका अर्थ श्रवण गरी नारायणकन हृदय विखे राखी परम धाममा प्राप्त हुनु भयो. यिनै रणबहादुरशाह महाराजाधिराजका श्री ललितत्रिपुरसुन्दरी देवी, कान्छा महारानी हुनु भयो. बहुत सौन्दर्यले युक्त भएका कैलाशबिषे विराजमान भएकी साक्षात् पार्वती जस्ता श्रीस्वामीज्यूले आफ्ना काखमा राखिदिएका पुत्र श्रीगीर्वाणयुद्ध बिक्रमशाह महाराजाधिराजविषे प्राण राखिकन नारायणका चरणारविन्द विषे चित्त लगाई सर्वदा पुण्यकर्म गर्न्या भएका दीन अनाथ जसका गति केही पनि छैन. यस्ता जनविषे करुणा बहुतै गर्न्या. पतिव्रतामा अग्रगण्य भएका यस्ता सो कान्छा महारानी हुनुहुन्छ. श्रीरणबहादुरशाह महाराजाधिराज देखिन समुद्रदेखि उदाएका पूर्णचन्द्रले झैं सकल लोककन अत्यन्त आह्लादन गर्न्या. डेढ वर्षका उमेरमा आफ्ना पिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीन राज्याभिषेक पाएका कर्णभन्दा पनि बडा दाता कामदेवभन्दा पनि अति सुन्दर धर्मराज जस्ता अति सत्यवादी सदा धर्मकर्म गर्न्या। अर्जुन जस्ता बडा शूर समुद्र जस्ता अति गम्भीर पनि धीर पनि भएका सूर्य जस्ता बडा तेजस्वी भोजराजभन्दा पनि कविता सुन्दामा बडो प्रसाद दिन्या इत्यादि सकल राजगुणले युक्त भएका श्रीगीर्वाणयुद्ध विक्रमशाह महाराजाधिराज पैदा हुनु भयो. जसका जेठा महारानी श्रीसिद्धिलक्ष्मी देवी हुनुहुन्छ. यिनै महाराजा महारानीमा कलियुगका महिमाले छेरी भूमिमा जो जो भारका कारण छन्, तिनको विनाश गर्ना निमित्त कृष्णजीको अवतार महाराज रुक्मिणीजीको र सत्यभामाजीको अवतार यी दुइ महारानी हुन् भनि लोक यस्तो तर्कणा गर्दछन्. जस महाराजाका सकल मन्त्रिविषे शिरोमणि भएका भीमसेन थापा काजी छन् जो काजी दैववशले श्रीस्वामीज्यूको अकस्मात् परलोक हुनु एहि घोर विघ्न आउँदामा पनि धीर गम्भीर बुद्धिले सकल उपद्रवको निवारण गरी श्रीमहाराजाको रक्षा गर्न्या. श्रीमहाराजाको आयुस्य पुण्य प्रतापकीर्ति राज्य बढोस् भन्ना निमित्त बहुत दिनदेखि जीर्ण भएको भंडारखालकन अनेक तरहका चुनागिरिले जग् जग् भएका अनेक तरहका फलफुलका वृक्ष औषधि लतादिले पूर्ण भएको अति सुन्दर तुल्याउनमा जग्गा-जग्गामा बाटाको संस्कार गरी सडक बनाउन शहरका ढोका-ढोका छेउका पाटी हेरू दर्बारको सुनको ढोकाहरू बनाइ सस्कार गर्न्या. बारूद खाना मजाक देवल विश्नुमतीको पूल वारीपारीका धर्मशाला घाट सुनको धारा गोर्खाको दरबार इत्यादि बनाउना आफ्ना प्रभुकन बाल्यैवस्थैमा धनु हान्न, हरिकथा श्रावण गर्न घोडा चढ्न पौन्हन इत्यादि सकल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजनीतिमा कुशल तुल्याउन, जसका क्रोधमा सव थर्थरायमान काँप्दछन्. जो आफ्ना प्रभुदेखि महतारी झैं हित गर्दछन्. पिता झैं उपदेशको वार्ता बिन्ती गर्दछन्. वन्धुवर्ग झैं स्नेह गर्दछन्. सत्स्त्री झैं सुख दिन्छन् सेवामा दास झैं जो रहन्छन्. जसका मन्त्रणामा चीनका पात्साहसितको थाहा पनि वन्दो जान्छ जसका मन्त्रणाले आफ्ना बाबा अमरसिंह थापा काजीलाई सिमानामा राजनाले बढ्याएको फिरङ्गी पनि आकन सक्दैन जसका भाइ नयनसिंह थापाले पनि काङ्डाकोटमा प्रभुका निमित्त लडाईंमा प्राण दियो जो काजी यो नेपाल उपद्रवको घर हो प्रभुभन्या बालक मैले संहार गऱ्यो हो भन्ना निमित्त गृहसुख छोडि पनि दरबारमा बसी भित्र बाहिर सर्वत्र नजर दिई, खबरदार भै रहन्छन्. जसले लगाएका भाइ वखतवारसिंह काजी श्रीमहाराजका हजूरमा बसी श्रीमहाराजका रक्षा रातदिन गर्दछन्. जसका रक्षा निमित्त बडा भ्रातृभक्त भएका अमृत काजी रणबीर काजी सर्वदा साथ रहन्छन् जसकाजीले सेवा गरिएका श्रीमहाराजाविषे कविजनहेरु यस्तो वर्णन गर्दछन् श्रीमहाराजा कृष्णजीका अवतार हुन् भन्या यी काजी गरुडका अवतार हुन् श्रीमहाराजा रामजीका अवतार हुन् भन्या यो काजी हनुमानका अवतार हुन भनी इत्यादि प्रकारले वर्णन गर्दछन् यस्ता काजी प्रभुको सर्वप्रकारले हितै गर्न्या जस महाराजाका प्रीतिपात्र छन् तिनै भीमसेन थापा काजीसित सल्लाहा गरी श्रीललतत्रिपुर सुन्दरी देवी नाम भएका श्रीस्वामी रणबहादुरशाहका कान्छा महारानीले कीर्ति र श्रीस्वामीज्यूको उद्धार हवस् भन्ना निमित्त यो बाग्मतीको पूल बनाउना कन इच्छा गरी हुकुम बक्सनु भयो वहाँदेखि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकल राज्यको भार पाएका प्रभुका भएका बडा बुद्धिमान भीमसेन थापा काजीले एस काममा वहुत चित्त लगाई लक्ष्मीनारायण डिठ्ठा मुख्य गरी लोकनाथ पाण्डे सुब्बा जयद्रथ सुबेदार, ददवार सुबेदार फ्हु वरलामा सुब्बा प्रभृति अनेक मनुष्यकन लगाई शाके १७३२ संवत् १८६७ सालका मार्गशीर्ष महीनाका शुक्लपक्ष एकादशी तिथि रेवती नक्षत्र सिद्धियोग वणिक्करण बृहस्पतिवार मकर लग्नमा शिलान्यासपूर्वक एक वर्षमा तेह्रसय त्रिपन्न हातको यो पूल सुवर्णसिंहको ध्वज भएका कीर्तिस्तम्भले शोभायमान भएको वरिपरि धर्मशाला ग्रामहेरु भएको सिद्ध गरी महाराजा महारानीकन संतुष्ट गराए वाह्रदेखि १८६८ सालका चैत्र कृष्ण सप्तमी बृहस्पतिवार अनुराधा नक्षत्र हर्षणयोग बवकरण मिथुन लग्नमा कुम्भको आदित्य हुँदामा यज्ञदान पुण्य गरी पुत्र श्रीगीर्वाणयुद्ध विक्रमशाह महाराजाधिराजलेसँग भई श्रीललितत्रिपुर सुन्दरी महारानीले श्रीजगदीश्वर प्रीतिपूर्वक श्रीस्वामीज्यूका उद्धार निमित्त वरिपरि धर्मशाला गुठी खेतलेसँग भएको यस पूलको उत्सर्ग गर्नु गयो । शुभंभूयादीश्वरप्रसादात् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भारतपट्टिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

^ निवृत्तविषयैः(विषयेभ्यो निवृत्ताः) वचनेप्सित आश्रय: '

कुमारगुप्तको पालाको मन्दसोर अभिलेख

१. [सिद्धम् ॥]

[यो वृत्यर्थ] मुपास्यते सुरगणैं [स्सिद्धैश्च] सिद्धर्यात्थिभि-
द्ध्यानैकाग्रपरैर्व्विधेयविषयैम्मोक्षार्त्थिभिर्य्योगिभिः ।
भक्त्या तीव्रतपोधनैश्च मुनिभिश्शापप्रसादक्षमैः
र्हेतुर्य्यो जगतः क्षयाभ्युदययोः पायात् स वो भास्करः ॥ (१)

तत्वज्ञानविदोऽपि यस्य न विदुर्ब्रह्मर्ष

२. योभ्युद्यता (तः)

कृत्स्नं यश्च गभस्तिभिः प्रवृसृत ⌒ पु[ष्ण]ा ति लोकत्रयम् ।
ग [न्ध] र्व्वामरसिद्धकिन्नरनरैस्संस्तूयतेभ्युत्थितो
भक्तेभ्यश्च ददाति योभिलषितं तस्मै सवित्रे नमः ॥ (२)

य ⌒ [प्र] त्यहं प्रतिविभात्युदयाचलेन्द्र-
विस्तीर्णतुङ्गशिखरस्खलितांशुजालः [।]
क्षीवाङ्गना

३. जनकपोलतलाभिताम्रः
पायात्स वस्सु [कि] रणाभ [रणो] विवस्वान् ॥ (३)

कुसुमभरानततरुवर - देवकुलसभाविहाररमणि [णी] यात् ।
लाटविषयान्नगावृतशैलाज्जगतिप्रथितशिल्पाः ॥ (४) आर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते देशपार्त्थिवगुणापहृताः प्रकाशः—
मद्ध्वादिजन्यविरलान्यसुखा —
४. न्यपास्य
जातादरा दशपुरं प्रथमं मनोभि-
रन्वागतास्ससुतबन्धुजनास्समेत्य ॥ (५)
मत्तेभगण्डतटविच्युतदानबिन्दु-
सिक्तोपलाचलसहस्रविभूषणायाः [।]
पुष्पावनम्रतरुषण्डवतंसकाया
भूमेऽपरन्तिलकभूतमिदं क्रमेण ॥ (६)
तटोत्थवृक्षच्युत—
५. नैकपुष्प —
विचित्रतीरान्तजलानि भान्ति ।
प्रफुल्त (ल्ल) पद्माभरणानि यत्र
सरांसि कारण्डवसंकुलानि ॥ (७)
विलोलवीचीचलितारविन्द -
पतद्रजः पिञ्जरितैश्च हंसैः ।
स्वकेसरोदारभरावभुग्नैः
क्वचित्सरांस्यम्वुरुहैश्च भान्ति ॥ (८)
स्वपुष्प (ष्प) भारावनतैर्न्नगेन्द्रैः
६. मद
प्रगल्मालिकुलस्वनैश्च ।
प्रजस्रगाभिश्च पुराङ्गनाभि-
र्व्वनानि यस्मिन्समलंकृतानि ॥ (६)

१- तेषां (पक्षिणां) विशेषा हारीतो मद्गुः काण्डवः प्लवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चलत्पताकान्यबलासनाथा-
न्यत्यर्थं शुक्लान्यधिकोन्नतानि ।
तडिल्लताचित्रसिताभ्रकूट
तुल्योपमानानि गृहाणि यत्र ॥ (१०)

कैलासतुङ्गशिखरप्रतिमानि चान्या-
न्याभान्ति दीर्घवलभी—
७. नि सवेदिकानि ।
गान्धर्व्व शब्दमुखरानि (णि) निविष्ट चित्र-
कर्म्माणि लोलकदलीवनशोभितानि ॥ (११)

प्रासादमालाभिरलंकृतानि
धरां विदार्य्येव समुत्थितानि ।
विमानमालासदृशानि यत्र
गृहाणि पूर्णेन्दुकरामलानि ॥ (१२)

यद्भात्यभिरम्यसरिद्वयेन चपलोर्म्मिणा समुपगूढम् ।
८. रहसि कुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव ॥ (१३)

सत्य [क्षमा] दमशमव्रतशौचधैर्य्य-
[स्वाध्या] यवृत्तविनयस्थितिबुद्ध्युपेतैः ।
विद्यातपोनिधिभिरस्मयितैश्च विप्रै-
र्यद्भ्राजते ग्रहगणैः खमिव प्रदीप्तैः ॥ १४ ॥

अथ समेत्य निरन्तरसङ्गतै-
रहरहः प्रविजृम्भित-सौहृदाः [।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपतिभिस्सुतवत्प्रतिम [ा] निताः
प्रमुदिता न्यवसन्त सुखं पुरे ॥ (१५)
श्रवण [सु] भग [ं] ध [ा] नुर्व्वे [द्यं] दृढं परिनिष्ठिताः
सुचरितशतासङ्गाः केचिद्विचित्रकथाविदः ।
विनयनिभृतास्सम्यग्धर्म्मप्रसङ्गपरायणा
प्रियमपरुषं पत्थ्यं चान्ये क्षमा बहुभाषितुं ॥ (१६)

२०. केचित्स्वकर्म्मण्यधिकास्तथान्यै
र्व्विज्ञायते ज्योतिम (ष) मात्मवद्भिः ।
[अद्यापि] चान्ये समरप्रगल्भाः
[कु] र्व्वन्त्यरीणामहितं प्रसह्य । [।] ॥ (१७)
प्राज्ञा मनोज्ञवध्वः प्रथितोरुवंशा
वंशानुरूप- चरित्रभरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकारदक्षा
विस्रम्भ

२१. [पूर्व्वं] मपरे दृढसौहृदाश्च ॥ (१८)
विजितविषयसङ्गैर्द्धर्म्मशीलैस्तथान्यै-
[र्मृ] दुभि [रधि] क स [त्वैर्ल्लोकयात्रा] मरैश्च ।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारै-
रधिकमभि [वि] भाति श्रेणिरेवं प्रकारैः ॥ (१९)
तारुण्यकान्त्युपचितोपि सुवर्णहार-
तांबूलपुष्पविधिना सम

२२. [लंकृतोपि]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

= नारीजन: प्रियमुपैति न तावदग्र्यां

 कोणस्तु स्त्रियः पाल्यश्रिकोट्यः (अमर) हतियारको टुप्पो.

नारीजनः प्रियमुपैति न तावदग्रयां (ग्र्यां)
यावन्न पट्टमयवस्त्र [यु] गानि धत्ते ॥ (२०)

स्पर्श [वता वर्णा] न्तरविभागचित्रेण नेत्रसुभगेन [।]
यैस्सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण ॥ (२१) आर्या-

विद्याधरी रुचिरपल्लवकर्णपूर
वातेरिता [स्थिर] तरं प्रतिचिन्त्य
१३. [लो] कं ।
मानुष्यमर्थनिचयांश्च तथा विशालान्
[स्ते] षां शुभा [म] ति [रभूद] चला ततस्तु ॥ (२२)

चतु [स्समुद्रान्त] विलोलमेखलां
सुमेरुकैलासबृहत्पयोधराम्
वनान्त॰॰ वान्त- स्फुटपुष्पहासिनीं
कुमारगुप्ते पृथिवीं प्रशासति ॥ (२३) रूपक॥

समानधीश्शुक्रबृहस्पतिभ्यां
ललामभूतो भुवि
१४. पार्त्थिवानाम् ।
रणेषु यः पार्त्थसमानकर्म्मा
बभूव गोप्ता नृपविश्ववर्मा ॥ (२४) उपमा
अन्यान्य आर्याके- मन्दहोगको ।

दीनानुकंपनपरः कृपणार्त्तवर्ग-
सन्ध [ा] प्रदोधिकदयालुरनाथनाथः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[क] ल्पद्रुमः प्रणयिनामभयं-प्रदश्च

भीतस्य यो जनपदस्य च बन्धुरासीत् ॥ (२५)

तस्यात्मजः स्थैर्य्यनयोपपन्नो

ब [न्धु] प्रियो

१५. बन्धुरिव प्रजानाम् ।

बंध्वर्तिहर्त्ता नृप बन्धुवर्म्मा

द्विड्दृप्तपक्षक्षपणैक [द] क्षः ॥ (२६)

कान्तो युवा रणपटुर्व्विनयान्वितश्च

राजापि सन्नुपसृतो न मदैः स्मयाद्यैः ।

शृङ्गारमूर्तिरभिभात्यनलंकृतोपि

रूपेण य कुसुमचाप इव द्वितीयः ॥ (२७)

वैधव्यतीव्रव्यसनक्षतानां

१६. स्मि (स्मृ) त्वा यमद्याप्यरिसुन्दरीणाम्

धनस्तनायासकरः प्रकम्पः ॥ (२८)

तस्मिन्नेव क्षितिपति व्रि (वृ) षे वंधुवर्म्मण्युदारे

सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे ।

[शि] ल्पावाप्तैर्द्धनसमुदयैः पट्टवा [यैरु] दारं

श्रे [णीभूतै] र्भवनमतुलं कारितं

१७. दीप्तरश्मेः ॥ (२९)

विस्तीर्णतुङ्गशिखरं शिखरि प्रकाश-

मभ्युद्गतेन्द्वमलरश्मिकलाप [गौ] रं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्भाति पश्चिमपुरस्य निविष्टकान्त-

चूडामणिप्रतिसमन्नयनाभिरामम् ॥ (३०)

रामासनाथ [र] चने दरभास्करांशु -

वन्हिप्रतापसुभगे जललीनमीने ।

चन्द्रांशुहर्म्यतल-

१८. चन्दनतालवृन्त-

हारोपभोग (ग) रहिते हिमदग्धपद्मे ॥ (३१)

रोद्ध्रप्रियंगुतरुकुन्दलताविकोश

पुष्पा [सव] प्रमु [दि] तालि कलाभिरामे । आलिकल /

काले तुषारकणकर्क्कशशीतवात-

वेगप्रवृत्तलवनीनगणैकशाखे ॥ (३२)

स्मरवशग तरुणजन वल्लभाङ्गना विपुलकान्तपीनोरु

१९. स्तनजघनघनालिङ्गननिर्भर्त्सिततुहिनहिमपाते ॥ ३३ ॥ आर्या

[मा] लवानां गणस्थित्या या [ते] शतचतुष्टये

त्रिनवत्यधिकेब्दानामृ (मृ) तौ सेव्यघनस्तने (स्वने ?) ॥ (३४)

सहस्यमासशुक्लस्य प्रशस्तेह्नि त्रयोदशे ।

मङ्गलाचारविधिना प्रासादोयं निवेशितः ।

वहुना समतीतेन

२०. कालेनान्यैश्च पार्त्थिवैः

व्यशीर्य्यतैकदेशोस्य भवनस्य ततोधुना ॥ (३६)

स्वयशो [वि (वृ) द्धये सर्व्वमत्युदा] रमुदारया ।

संस्कारितमिदं भूयः [श्रेण्या] भानुमतो गृहम् ॥ (३७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्युन्नतभवदातं नभ (:) स्पृशन्निव मनोहरैश्शिखरैः । आर्या
शशिभान्वोरभ्युदयेष्वमलमयूखायतन—
२१. भूतं ॥ ३८ ॥
वत्सरशतेषु पंचसु विंशत्यधिकेषु नवसु चाब्देषु ।
यातैष्वभिरम्य [तप] स्यमासशुक्लद्वितीयायां ॥ (३९) आर्या
स्पष्टैरशोकतरुकेतकसिंदुवार-
लोलातिमुक्तकलतामदयंतिकानां ।
पुष्पोद्गमैरभिनवैरधिगम्य नून—
मैक्यं विजृंभितशरे हरपूतदेहे ॥ (४०)
२२. मधुपानमुदितमधुकरकुलोपगीतनगनैकपृथुशाखे ।
काले नवकुसुमोद्गमदंतुरकांतप्रचुररोध्रे ॥ (४१) आर्या
शशिनेव नभो विमलं कौ [स्तु] भमणिनेव शार्ङ्गिणो वक्षः ।
उपगीति भवनवरेण तथेदं पुरमखिलमलंकृतमुदारं ॥ ४२ ॥ आर्या
अमलिनशशि-
२३. लेखादंतुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानां ।
वि [कचक] मलमालामंससक्तां च शार्ङ्गी
भवनमिदमुदारं शाश्वतन्तावदस्तु ॥ (४३)
श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्व्वा चेयं प्रयत्नेन रचिता वत्सभट्टिना ॥ (४४)
२४. स्वस्ति कर्तृलेखकवाचकश्रोतृभ्यः ॥ सिद्धिरस्तु ॥

१- दन्तुरस्तून्नतरदे तथोन्नतनते त्रिषु. (मेदिनी)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवि अज्ञात

यशोधर्मन्‌को मन्दसोर स्तम्भाभिलेख

१. सिद्धम् [॥]

स जयति जगतां पतिः पिनाकी
स्मित रवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती
तिरयति च स्फुटयत्यदश्च विश्वम् ॥ (१)
स्वयम्भूर्भूतानां स्थितिलय [समु]-

२. त्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता
स शम्भुर्भूयान्सि प्रतिदिशतु भद्राणि भव [ताम्] ॥ २ ॥
फणमणिगुरुभार [ाक्रा]

३. न्ति दूरावनम्रं
स्थगयति रुचमिन्दोर्म्मण्डलं यस्य मूर्द्ध्नाम् [।]
स शिरसि विनिवघ्नन्रन्ध्रिनीमस्थिमालां
सृजतु भवसृजो नः क्लेशभङ्गं भुजङ्गः ॥ (३)
षष्ट्या सहस्रैः सगरात्मजानां
खातः

४. खतुल्यां रुचमादधानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्योदपानाधिपतेश्चिराय

यशान्सि पायात्पयसां विधाता ॥ (४)

अथ जयति जवेन्द्रः श्रीयशोधर्म्मनामा

प्रमदवनमिवान्तः शत्रुसैन्यं विगाध्य [।]

व्रण –

५. किसलयभङ्गैर्य्योङ्गभूषां विधत्ते

तरुणतरुलतावद्वीरकीर्त्तीर्व्विनाम्य ॥ (५)

आजौ जितौ विजयते जगतीम्पुनश्च

प्रख्यात औलिकरलाञ्छन आत्म—

६. वङ्शो (वंशो)

येनोदितोदितपदं गमितो गरीयः ॥ (६)

प्राचोनृपान्सुबृहतश्च बहूनुदीचः

साम्ना युधा च वशगान्प्रविधाय येन [।]

नामापरं जगति कान्तमदो दुरापं

राधाधिराज परमेश्वर

७. इत्युदूढम् ॥ (७)

स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूम्रै –

रम्भोमेघ्यं मघोनावधिषु विदधता गाढसम्पन्नसस्याः ।

संहर्षाद्वाणिनीनां कररभसहृतो—

८. द्यानचूताङ्कुराग्रा

राजन्वन्तो रमन्ते भुज– विजितभुवा भूरयो येन देशाः ॥ (८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्योत्केतुभिरुन्मदद्विपकर- व्याविद्धलोध्रद्रुमै—

रूद्धूतेन वनाध्वनि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्ब्बलैः [।]

बाले -

९. यच्छवि धूसरेण रजसा मन्दाङ्शुसंलक्ष्यते

पर्य्यावृत्त शिखण्डि चन्द्रक इव ध्यामं रवेर्मण्डलम् ॥ (९)

तस्य प्रभोर्व्वंङ्शकृतां नृपाणां

पादाश्रयाद्विश्रुतपुण्यकीर्त्तिः ।

भृत्यः स्वनैभृत्यजिता—

१०. रिषट्क

प्रासीद्वसीयान्किल षष्ठिदत्तः ॥ (१०)

हिमवत इव गाङ्गस्तुङ्गनम्रः प्रवाहः

शशभृत इव रेवा-वारिराशिः प्रथीयान् [।]

परमभिगमनीयः शुद्धिमानन्ववायो

यत उदित गरि—

११. म्णस्तायते नैगमानानाम् ॥ (११)

तस्यानुकूलः कुलजात्कलत्रा-

त्सुतः प्रसूतो यशसां प्रसूतिः ।

हरेरिवांङ्शं वशिनं वराङ्गं

"वराहदासं" यमुदाहरन्ति ॥ (१२)

सुकृतिविषयितुङ्गं रूढमूलं

१२. धरायां

स्थितिमपगतभङ्गां स्थेयसीमादधानम् [।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुशिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव 'रविकीर्त्तिः' सुप्रकाशं व्यधत्त ॥ (१३)
बिभ्रता शुभ्रमभ्रूङ्शि स्मार्त्तं वर्त्मोचितं सताम् [।]
न विसंव्वा-
१३. दिता येन कलावपि कुलीनता ॥ (१४)
युत धीदीधिति ध्वान्तान्हविर्भुज इवाध्वरान् [।]
भानुगुप्ता ततः साध्वी तनयांस्त्रीनजीजनत् ॥ (१५)
'भगवद्दोष' इत्यासीत्प्रथमः कार्य्यवर्त्मसु ।
धाल-
१४. म्बनं बान्धवानामन्धकानामिवोद्धवः ॥ (१६)
बहुनयविधिवेधा गह्वरेप्यर्थ - मार्ग्गे
विदुरइव विदूरं प्रेक्षया प्रेक्षमाणः ।
वचन- रचनबन्धे संस्कृतप्राकृते यः
कविभिरुदि-
१५. तरागं गीयते गीरभिज्ञः ॥ (१७)
चर प्रणिधि- दृगनुगन्त्रा यस्य बौद्धेन चाक्ष्णा
न निशि तनु दवीयो वास्त्यदृष्टं धरित्र्याम् [।]
पदमुदधि दधानोनन्तरं तस्य चाभू-
त्स भयमभयदत्तो नाम
१६. वि [ध्न] न्प्रजानाम् ॥ (१८)
बिन्ध्यस्यावन्ध्यकर्म्मा शिखरतट पतत्पाण्डुरेवाम्बुराशे—
र्गोलाङ्गुलैः सहेलप्लुतिनमितपुरोः पारियात्रस्य चाद्रेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसिन्धोरन्तरालं निज शुचिसचिवाद्धया–

१७. सितावेक देशं

राजस्थानीय वृत्या सुरगुरुरिव यो वर्णिनां भूतयेऽपात् ॥ (१९)

विहितसकलवर्णासङ्करं शान्तडिम्बं "डिम्बे डमरविप्लवौ"

कृत इव कृतमेतद्येन राज्यं निराधि

स धुरमयमिदानीं

१८. दोषकुम्भस्य सूनु-

र्गुरुवहति तदूढां धर्म्मतो धर्म्मदोषः[1] ॥ (२०)

स्वसुखमनभिवाञ्छन्दुर्गमेद् छ्वन्यसङ्गां

धुरमतिगुरुभारां यो दधद्धूर्तुरथैं ।

वहति नृपतिवेषं केवलं लक्ष्ममात्रं

१९. वलितमिव विलम्बं कम्बलं बाहुलेयः ॥ (२१)[1]

उपहितहितरक्षामण्डनो जातिरत्नै–

र्भुज इव पृथुलांसस्तस्य दक्षःकनीयान् [।]

महदिदमुदपानं खानयामास बिभ्र–

२०. च्छ्रुतिहृदय नितान्तानन्दिनिर्द्दोषनामा ॥ (२२)

---

१. तुलनीय—स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः

प्रतिदिनमथवा ते सृष्टिरेवं विधैव ।

अनुभवति हि मूर्द्ध्ना पादपस्तीव्रमुष्णम्

शमयति परितापं छायया संश्रितानाम् ।

(अभिज्ञानशाकुन्तल अंक ५ श्लोक–९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखाश्रेयच्छायं परिणतिहितस्वादुफलदं
गजेन्द्रेणारुग्णं द्रुममिव कृतान्तेन बलिना।
पितृव्यं प्रोद्दिश्य प्रियमभयदत्तं पृ—
२१. थुधिया
प्रथीयस्तेनेदं कुशलमिह कर्म्मोपरचितं ॥ (२३)
(५८९) पञ्चसु शतेषु शरदां यातेष्वेकान्नवति सहितेषु। एकोन
मालवगणस्थितिवशात्कालज्ञानाय लिखितेषु ॥ (२४)
य-
२२. स्मिन्काले कलमृदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोषितानांमनांसि।
भृङ्गालीनां ध्वनिरनुवनं भारमन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छ्रूयते पुष्प-
२३. केतोः ॥ (२५)
प्रियतमकुपितानां कम्पयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनां [।]
उपनयति नभस्वान्मानभङ्गाय यस्मि-
न्कुसुम समयमासे तत्र निर्म्मापितोयम् ॥ (२६)
२४. यावत्तुङ्गैरुदन्वान्किरणसमुदयं सङ्ग कान्तं तरङ्गै-
रालिङ्गन्निन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम् [।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिभ्रत्सौधान्त लेखा वलयपरिगति मुण्डमालामिवायं

सत्कूपस्तावदा-

२८. स्ताममृतसमरस -

स्वच्छ निष्यन्दिताम्बुः ॥ (२७)

धीमान् दक्षो दक्षिणः सत्यसन्धो

ह्रीमांच्छूरो वृद्धसेवीकृतज्ञः ।

बद्धोत्साहः स्वामिकार्य्येष्वखेदी

निर्दोषोयं पातु धर्म्मं चिराय ॥ (२८)

उत्कीर्णा गोविन्देन ॥

११
१८
३४
५४
४४
२८
१८९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिशिष्ट भाग

विशेष शब्दहरूको टिप्पणी

गोप्ता—गुप्तकालिक प्रशासनमा प्रान्तीय शासक (गभर्नर) को तत्कालीन नाम ।

मालव संवत्—विद्वान्हरू विक्रम र मालवसंवत् एउटै मान्दछन् । विक्रम संवत् ईस्वी संवत् पूर्व ५७ मा प्रारम्भ भएको थियो ।

लाट—विद्वान्हरूको कथन अनुसार लाट दक्षिणगुजरातलाई भनिन्थ्यो । लाटले सूरत, भडोंच (Broach), खेडा र बड़ोदाका केही भागलाई जनाउँथ्यो भनिन्छ ।

दशपुर—मन्दसोरको पुरानो नाम । मन्दसोर मध्यभारतमा पर्दछ ।

सामन्त—प्रान्तीय शासकको रूपमा यस शब्दको विशेष व्यवहार देखिन्छ ।

मल्लपुरी—मानदेवको चांगुनारायण अभिलेखमा उनले मल्लपुरीलाई जितेको वर्णन गरिएको छ । साधारण रूपमा मल्लहरूको शहर (राजधानी) अर्थ गर्न सकिन्छ । यसको ठीक अर्थ गर्न अलि गाहारो छ । कसैले मल्लपुरीलाई कता कसैले कता मानेका छन् । डा० हित-नारायण झाज्यूले मल्लपुरी गोरखपुरलाई भनिएको भन्ने तर्क प्रस्तुत गर्नु भएको छ । पश्चिमका मल्लहरू बराबर लिच्छविशासकसँग विद्रोह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरिरहन्थे अतः लिच्छविराजाहरूले आफ्ना रैतीमाथि युद्ध खर्च उठाउन "मल्लकर" लगाएका थिए भन्ने कुरा तत्कालीन अभिलेखहरूबाट ज्ञात हुन्छ ।

पुष्पपुर—आधुनिक पटना । कसैले यस्तो अर्थ पेशावर पनि गरेका छन् ।

श्रेणी—संघटन । यस अभिलेखमा यो शब्द पट्टवाय (जुलाहा) हरूको संघटनको अर्थमा प्रयुक्त गरिएको छ ।

पारियात्र—विन्ध्यपर्वतको दक्षिणभाग ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पढ्नुहोस्

अंशुवर्मा एक ऐतिहासिक अध्ययन

मोल १।५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu